श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीतम्

# ॥ श्री अष्टभुजाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अष्टभुजाष्टकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

गजेन्द्ररक्षात्वरितं भवन्तं ग्राहैरिवाहं विषयैर्विकृष्टः।
अपारविज्ञानदयानुभावम् आप्तं सतामष्टभुजं प्रपद्ये॥ 1॥

त्वदेकशेषोऽहमनात्मतन्त्रः त्वत्पादलिप्सां दिशता त्वयैव।
असत्समोऽप्यष्टभुजास्पदेश सत्तामिदानीमुपलम्भितोऽस्मि॥ 2॥

स्वरूपरूपास्त्रविभूषणाद्यैः परत्वचिन्तां त्वयि दुर्निवाराम्।
भोगे मृदूपक्रमतामभीप्सन् शीलादिभिर्वारयसीव पुंसाम्॥ 3॥

शक्तिं शरण्यान्तरशब्दभाजां सारं च सन्तोल्य फलान्तराणाम्।
त्वद्दास्यहेतोस्त्वयि निर्विशङ्कं न्यस्तात्मनां नाथ बिभर्षि भारम्॥ 4॥

अभीतिहेतोरनुवर्तनीयं नाथ त्वदन्यं न विभावयामि।
भयं कुतः स्यात् त्वयि सानुकम्पे रक्षा कुतः स्यात् त्वयि जातरोषे॥ 5॥

त्वदेकतन्त्रं कमलासहाय स्वेनैव मां रक्षितुमर्हसि त्वम्।
त्वयि प्रवृत्ते मम किं प्रयासैः त्वय्यप्रवृत्ते मम किं प्रयासैः॥ 6॥

समाधिभङ्गेष्वपि सम्पतत्सु शरण्यभूते त्वयि बद्धकक्ष्ये।
अपत्रपे सोढुमकिञ्चनोऽहं दूराधिरोहं पतनं च नाथ॥ 7॥

प्राप्ताभिलाषं त्वदनुग्रहान्मां पद्मानिषेव्ये तव पादपद्मे।
आदेहपातादपराधदूरम् आत्मान्तकैङ्कर्यरसं विधेयाः॥ 8॥

**प्रपन्न जनपाथेयं प्रपित्सूनां रसायनम्।**
**श्रेयसे जगतामेतत् श्रीमदष्टभुजाष्टकम्॥ 9॥**

**शरणागतसन्त्राणत्वराद्विगुणबाहुना।**
**हरिणा वेङ्कटेशीया स्तुतिः स्वीक्रियतामियम्॥ 10॥**

॥ इति श्री अष्टभुजाष्टकं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥